# Shri Dhanalakshmi Stotram

# શ્રીધનલક્ષ્મીસ્તોત્રમ્

## Document Information

Text title : dhanalakShmI stotram dhaneshvari

File name : dhanalaxmii.itx

Category : devii, lakShmI, stotra, devI

Location : doc_devii

Author : Traditional

Proofread by : Sridhar Seshagiri, Usha Rani Sanka usharani.sanka at gmail.com

Latest update : December 29, 2001, November 28, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

Shri Dhanalakshmi Stotram

# શ્રીધનલક્ષ્મીસ્તોત્રમ્

શ્રીધનદા ઉવાચ-
દેવી દેવમુપાગમ્ય નીલકણ્ઠં મમ પ્રિયમ્ ।
કૃપયા પાર્વતી પ્રાહ શઙ્કરં કરુણાકરમ્ ॥ ૧॥
શ્રીદેવ્યુવાચ-
બ્રૂહિ વલ્લભ સાધૂનાં દરિદ્રાણાં કુટુમ્બિનામ્ ।
દરિદ્ર-દલનોપાયમઞ્જસૈવ ધનપ્રદમ્ ॥ ૨॥
શ્રીશિવ ઉવાચ-
પૂજયન્ પાર્વતીવાક્યમિદમાહ મહેશ્વરઃ ।
ઉચિતં જગદમ્બાસિ તવ ભૂતાનુકમ્પયા ॥ ૩॥
સસીતં સાનુજં રામં સાઞ્જનેયં સહાનુગમ્ ।
પ્રણમ્ય પરમાનન્દં વક્ષ્યેઽહં સ્તોત્રમુત્તમમ્ ॥ ૪॥
ધનદં શ્રદ્ધાનાનાં સદ્યઃ સુલભકારકમ્ ।
યોગક્ષેમકરં સત્યં સત્યમેવ વચો મમ ॥ ૫॥
પઠન્તઃ પાઠયન્તોઽપિ બ્રાહ્મણૈરાસ્તિકોત્તમૈઃ ।
ધનલાભો ભવેદાશુ નાશમેતિ દરિદ્રતા ॥ ૬॥
ભૂભવાંશભવાં ભૂત્યૈ ભક્તિકલ્પલતાં શુભામ્ ।
પ્રાર્થયેત્તાં યથાકામં કામધેનુસ્વરૂપિણીમ્ ॥ ૭॥
ધર્મદે ધનદે દેવિ દાનશીલે દયાકરે ।
ત્વં પ્રસીદ મહેશાનિ! યદર્થં પ્રાર્થયામ્યહમ્ ॥ ૮॥
ધરામરપ્રિયે પુણ્યે ધન્યે ધનદપૂજિતે ।
સુધનં ધાર્મિકં દેહિ યજમાનાય સત્વરમ્ ॥ ૯॥ var યજનાય સુસત્વરમ્
રમ્યે રુદ્રપ્રિયે રૂપે રામરૂપે રતિપ્રિયે ।
શિખીસખમનોમૂર્ત્તે પ્રસીદ પ્રણતે મયિ ॥ ૧૦॥ var શશિપ્રભમનોમૂર્તે
આરક્ત-ચરણામ્ભોજે સિદ્ધિ-સર્વાર્થદાયિકે । var સિદ્ધસર્વાઙ્ગભૂષિતે
દિવ્યામ્બરધરે દિવ્યે દિવ્યમાલ્યોપશોભિતે ॥ ૧૧॥

સમસ્તગુણસમ્પન્ને સર્વલક્ષણલક્ષિતે ।
(અધિકપાઠ. જાતરૂપમણીન્દ્રાદિ-ભૂષિતે ભૂમિભૂષિતે ।)
શરચ્ચન્દ્રમુખે નીલે નીલ-નીરજ-લોચને ॥ ૧૨॥
ચઞ્ચરીકચમૂ-ચારુ-શ્રીહાર-કુટિલાલકે ।
મત્તે ભગવતિ માતઃ કલકણ્ઠરવામૃતે ॥ ૧૩॥ var મુખામૃતે
હાસાવલોકનૈર્દિવ્યૈર્ભક્તચિન્તાપહારિકે ।
રૂપ-લાવણ્ય-તારુણ્ય-કારુણ્ય-ગુણભાજને ॥ ૧૪॥
ક્વણત્કઙ્કણમઞ્જીરે લસલ્લીલાકરામ્બુજે ।
રુદ્રપ્રકાશિતે તત્ત્વે ધર્માધારે ધરાલયે ॥ ૧૫॥
પ્રયચ્છ યજમાનાય ધનં ધર્મૈકસાધનમ્ ।
માતસ્ત્વં મેઽવિલમ્બેન દિશસ્વ જગદમ્બિકે ॥ ૧૬॥ var માતર્મે માવિ
કૃપયા કરુણાગારે પ્રાર્થિતં કુરુ મે શુભે ।
વસુધે વસુધારૂપે વસુ-વાસવ-વન્દિતે ॥ ૧૭॥
ધનદે યજમાનાય વરદે વરદા ભવ । var યજનાયૈવ
બ્રહ્મણ્યૈર્બ્રાહ્મણૈઃ પૂજ્યે પાર્વતીશિવશઙ્કરે ॥ ૧૮॥ var બ્રહ્મણ્યે બ્રાહ્મણે
સ્તોત્રં દરિદ્રતાવ્યાધિશમનં સુધનપ્રદમ્ ।
શ્રીકરે શઙ્કરે શ્રીદે પ્રસીદ મયિ કિઙ્કરે ॥ ૧૯॥
પાર્વતીશપ્રસાદેન સુરેશ-કિઙ્કરેરિતમ્ ।
શ્રદ્ધયા યે પઠિષ્યન્તિ પાઠયિષ્યન્તિ ભક્તિતઃ ॥ ૨૦॥
સહસ્રમયુતં લક્ષં ધનલાભો ભવેદ્ ધ્રુવમ્ ।
ધનદાય નમસ્તુભ્યં નિધિપદ્માધિપાય ચ ।
ભવન્તુ ત્વત્પ્રસાદાન્મે ધન-ધાન્યાદિસમ્પદઃ ॥ ૨૧॥

॥ ઇતિ શ્રીધનલક્ષ્મીસ્તોત્રં અથવા ધનેશ્વરી સમ્પૂર્ણમ્ ॥

Proofread by Sridhar Seshagiri and
Usha Rani Sanka usharani.sanka at gmail.com

*Shri Dhanalakshmi Stotram*
pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*